पञ्चदशाङ्गयोगनिरूपणम्

Dr. V.V. Anilkumar
Asst. Professor, Sree Sankara College, Kalady

श्रुतिप्रोक्तानां "पञ्चदशाङ्गानां" यथावन्निरूपणं ग्रन्थे दरीदृश्यते । पञ्चदशाङ्गानि यमः, नियमः, त्यागः, मौनं, देशः, कालः, आसनं, मूलबन्धः, देहसाम्यं, दृकास्थिति, प्राणसंयमनं, प्रत्याहारः, धारणा, आत्मध्यानं, समाधिः च । योगशास्त्रे प्रोक्ताष्टाङ्गातिरिक्ततया उपाङ्गत्वेन त्यागमौनदेशकालमूलबन्धदेहसाम्यदृक् स्थित्यादयः सप्तवर्णितम् ।

यमः

सर्वं ब्रह्मेति वै ज्ञानात् इन्द्रियग्रामसंयमः यमोयमिति संप्रोक्तः अभ्यसनीयो मुहुर्मुहुः इति यमस्वरूपनिरूपणं तेजोबिन्दूपनिषदि कृतम् । यमादि गुणसम्पन्नः यमी, तत्स्वरूपं प्रकरणे एवमुक्तम् श्रीमन्तः पुण्यपापैः गुरुवरमुपलभ्येश्वरस्य प्रसादात् सर्वं ब्रह्मेति बोधात् प्रबलविषयसंस्क्तमेतं चिरेण । नानादुःखैकहेतुं मुहुरपि करणग्राममायम्य नित्यं यः हिंसाद्यैरुपेतः जयति सहजतः सः अग्रयोगी यमी स्यात् । ईश्वरप्रसादात् सद्गुरुमुपलभ्य तदुपदिष्टवाक्यार्थश्रवणजनितावबोधात् श्रोत्रेन्द्रियादीन् करणान् नियम्य यः शब्दादिविषयाणां त्यागः कुरुते सः यमी स्यादिति । विषयाणां विनाशित्वसातिशय त्वदुःखसत्वादिदोषदर्शनात् जन्य इन्द्रियजयः अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहादिप ञ्चकभूतं भवति । किन्तु तेषां स्थैर्याय मुहुर्मुहु अभ्यसनं कार्यः । शयत्वदुःखसत्वादिदोषदर्शनात् जन्य इन्द्रियजयः अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा दिपञ्चकभूतं भवति । किन्तु तेषां स्थैर्याय मुहुर्मुहु अभ्यसनं कार्यः ।

अत्र आचार्यैरुक्तम् " इयं यमाख्यं प्राथमिकमङ्गं अष्टाङ्गयोगशास्त्रप्रसिद्धं यमात् शतगुणमुत्कृष्टं भवति । तत्र वाङ्मनकायादीनं विषयनिरोधमेवोक्तम्। अत्र ब्रह्मविचारमुक्त्वाभ्यासस्य निर्देशात् इयं उत्कृष्टमिति वादः ।

नियमः

तत्त्वमसि इत्युपदेशखमहावाक्यार्थश्रवणेन विजातीयविषये नावेशः संभवति। जीवब्रह्मणोः साजात्यप्रत्ययं तदैक्यस्यानुसन्धानं च साधकः नित्यमावर्तयति । तदा अविच्छिन्नतैलधारावत् ब्रह्मचिन्तां उदेति। शास्त्रानुविद्धे समाधौ स जयति स साधकः नियमी इत्युच्यते । नियमलक्षणं तेजोबिन्दूपनिषदि एवमुक्तम्- "सजातीयप्रवाहस्य विजातीयतिरस्कृतिः नियमो हि परानन्दो नियमात् क्रियते बुधैः ॥" विजातीयप्रत्ययप्रवाहोपरमेण सजातीयप्रत्ययप्रवाहाविष्टस्य संप्रज्ञातसमाधिरूपः योगाङ्गः भवति। तदुक्तं योगसूत्रे वितर्कविचारानन्दास्मितारूपानुगमात् संप्रज्ञात इति। नियमिनः संप्रज्ञातसमाधिसमन्वितं सिद्ध्यतीत्याशयः।

त्यागः

त्यागः प्रपञ्चरूपस्य सच्चिदात्मावलोकनात् त्यागो हि महतां पूज्यः सद्यो मोक्षमयो यतः इत्येवं प्रकारेण उपनिषदि त्यागस्वरूपमुक्तम्। स्थूलसूक्ष्मभेदेन प्रपञ्चः द्विविदः। स्थूलप्रपञ्चस्य त्यागः योगाय करणीय इति नियमे एव निर्देशः कृतो दृश्यते। अत्र सूक्ष्मप्रपञ्चत्यागः एव निर्दिश्यते । नामरूपात्मकस्य प्रपञ्चस्य अधिष्ठानं सच्चिदानन्दरूपं ब्रह्मैव । सर्वाधिष्ठानभूतस्य आत्मनः चैतन्यस्फुरणादेव घटपटादयः नामरूपतो प्रकाशते व्यवह्रियते च। स्वप्रकाशस्वरूपस्यात्मनः स्वरूपयाथात्म्यज्ञानं यदा जायते तदा एतेषां निवृत्तिः संभवेत्। अतः एव सूक्ष्मप्रपञ्चस्य त्यागे चिदात्मावलोकनस्य साङ्गत्यमत्र निर्दिष्टम् । चिदात्मत्वावलोकनं नाम स्वप्रकाशाचिदात्मस्वरूपमेव भावरूपाभ्यां प्रतीयते इति ज्ञात्वा यत् यत् वस्तु दृश्येन तत्सर्वं ब्रह्मैव इत्यनुसन्धानेन प्रपञ्चाविलयनं कर्तुं शक्यते। तदिव त्यागपदेनात्र सूच्यते। प्रपञ्चस्य नामरूपोपेक्षा एव त्यागः। भावानुवृत्तिः ब्रह्मणि क्रियमाणस्य ब्रह्मानुभूतिस्मरणं संभवति इति अत्र प्रपञ्ज्यते उक्तञ्च।

यः तत्याज प्रपञ्चं निखिलमपि महान् कोटिविद्ध्यण्डरूपं
त्यागी योगी तृतीयः गुणरहितपरब्रह्मनिष्ठः स पूज्यः ।

त्यागाख्यस्य तृतीयाङ्गस्य समुपार्जनेन योगी निर्गुणपरब्रह्मनिष्ठः स्यात् । तदा महद्भिः सः पूज्यो भवति च।

मौनम्

त्यागाचरणेन उपलब्धात्मभावसम्पन्नस्य जीवन्मुक्तस्य प्रारब्धदुःखनिवर्तते मौनं संप्रापणीयमित्यत्र निर्दिशते । तन्मौनं तु मुनेः भावः, व्यवहृतिरहितं भवति । शब्दप्रवृत्तिनिमित्तं जातिक्रियादीनां प्रतिभानं संभवति । शब्दाभावे मौने "यस्मात् वाचो निवर्तन्ते अप्राप्यमनसा सह " इत्यादिश्रुतिभिः निर्दिष्टं परब्रह्मस्वरूपं प्रत्यगभिन्नत्वेन प्राप्यते । अतः सर्वदा विवेकी बुधः अहं तद्ब्रह्मैव इत्यनुसन्धानात् मौनं योजनीयमित्यत्र निर्देशः । "मौनं साक्षान्मोक्षैकसाधनम्" इति सनत्सुजातः धृतराष्ट्रमुपदिशति ।

अत्र मौनस्य श्रौतं द्वैविध्यं अपरोज्ञानभूतौ प्रतिपाद्यते -यथा "यस्मात् वाचो निवर्तन्ते अप्राप्य मनसा सह यन्मौनं योगिभिर्गम्यं तद्भवेत् सर्वदा जडैः । वाचो यस्मान्निवर्तन्ते तद्वक्तुं केन शक्यते प्रपञ्चो यदि वक्तव्यः सोपि शब्दविवर्जितः इति वा तद्भवेन्मौनं सर्वं सहजसंस्थितम् । गिरा मौनं तु बालानां अयुक्तं ब्रह्मवादिनाम्"। ' अन्धवत् जडवच्चैव मुक्तवच्च महीं चरेत् ' इति उक्तिः मूकजडयोः ब्रह्मविदुपमानत्वं प्रत्यपादि । मूकस्य मौने सत्यपि भावनाव्यापारः किन्तु जडस्य मानसिकसंरभस्याप्यभावात् जडस्थं योगिगम्यं मौनमेव चतुर्थङ्गित्वेन निर्दिशते इति अवगच्छति ।

देशः ।

योगस्य पञ्चमो भागो भवति देशाविधिः । यमनियमवतः त्यागयुक्तस्य मुनेः जीवन्मुक्तपदारूढता संभवतीत्यतः सर्वत्र समदृष्टित्वं ब्रह्मभावश्च सिद्ध्यति । तस्मान्नः विजनदेशाश्रयणीयता तस्येत्याशङ्का जायेत । अतः विजनदेशाश्रयस्य कः स्वरूपः इति प्रतिपाद्यते ।

" आदावन्ते च मध्ये चल जनो यस्मिन् विद्यते

येनेदं सततं व्याप्तं स देशो विजनः स्मृतः" इति अपरोक्षानुभूत्यां आचार्यः तत्स्वरूपलक्षणं निर्दिशति । कालदेशावधिभ्यां निर्मुक्तः भवति परं ब्रह्म। ब्रह्मणि जनस्य त्रैकालिकनिषेधः । निर्विकल्पसमाधियुक्तस्य जीवन्मुक्तस्य आरम्भकाले मध्यकाले समाप्तिकाले च अनुभूताद्वैतबोधे न कोपि जनप्रतीतिः। उक्तञ्च 'यत्र नान्यत् पश्यति

" नान्यत् श्रुणोति नान्यद्विजानाति स भूमा " छा. 7.23

"नान्यदतोस्ति द्रष्टा श्रोता मन्ता विज्ञाता " बृ. 5-7-2

ब्रह्मेतरसर्वनिषिद्धत्वात् परिदृश्यमानं जगत्सर्वं ब्रह्मैव। ब्रह्मव्याप्तिरिक्तविजातीयतिरस्कारेण मनसः ब्रह्मणि युञ्चानं तत्र विधीयते- यथा

" योगी युञ्जीत सततं आत्मानं रहसि स्थितः
एकाकी यतचिन्तात्मा निराशीरपरिग्रहः " इति।

एवं ब्रह्मप्रदेशे सववसतिमनुभूतस्य स्वैकान्ताभ्यासाय अरण्यप्रदेशः गुहा वः नात्र विहितः किन्तु ब्रह्मदेशवासानुभवः एव निर्दिश्यते। तदेवोक्तम् -

तद्ब्रह्मैव प्रदेशः स्ववसतिविषयः संबभूवेह
यस्यारण्यं भूबृद्गुहा वा न नियमितमयं पञ्चमो देशयोगी ॥

(पञ्चशाङ्गप्रकरणे श्लोक -5)

कालः

षष्ठतया अनुगुणकालनिर्देशः क्रियते । काललक्षणमेवमुक्तम्- कलनात् सर्वभूतानां ब्रह्मादीनां निमेषतः। कालशब्देन निर्दिष्टं अखण्डानन्दमद्वयम्।।
निमेषादारभ्य लोकस्य सर्गस्थितिप्रलयाधारत्वात्, कलनात् कालः इति संज्ञा। सर्वस्यापि कारणं काल इति कालविदामभिप्रायः। लोकयतिकाः स्वभावं, मीमांसकाः नियतिलक्षणं कर्म च सर्वकारणं परिगृह्यन्ते। यथा -

कालः स्वभावो नियतिर्यदृच्छा
भूतानि योनिः पुरुषेति चिन्त्यम्।
संयोग एषां न त्वात्मलाभात्
आत्माप्यनीशः सुखदुःखहेतोः ॥ श्वे. उ - 1-2 ॥

चतुर्मुखब्रह्म एव लोकस्रष्टुत्वेन वर्णितः तस्य ब्रह्मणः कल्पना यस्मात् भवति तत् अखण्डानन्दस्वरूपः ब्रह्मैव कालशब्देन विवक्षितः , उक्तञ्च

यच्च ज्यादिस्वरूपं श्रुतिशतगदितं निष्कलानन्दमेकं
कालाख्यं ब्रह्म तत्र प्रकृतिमुपगतः कालयोगी तु षष्ठः ॥

(पञ्चदशाङ्गप्रकरणं श्लोकः 6)

एवं विवदतां मध्ये कालादीनां कारणत्वं निषिद्धञ्च। ते ध्यानयोगानुगता अपश्यन्

देवात्मशक्तिं स्वगुणैर्निगूढम् इत्यनेन देवात्मशक्तेः कारणत्वं प्रतिपादितम् । अतः काल इत्यनेन योगाङ्गेन ब्रह्मणः कालातीतत्वं सूच्यतेत्यगन्तव्यम्। कालातीतस्य ब्रह्मणः कालसंज्ञा आकाशातीतस्यापि ब्रह्मणः परमाकाशसंज्ञवत् ज्ञातव्यं भवति यथा - "सर्वव्यापकं निरतिशयानन्दलक्षणं परमाकाशं " इति मण्डलब्राह्मणोपनिषद् 4-3 ।

आसनम्

पञ्चदशयोगाङ्गेषु मध्ये सप्तमो योगः भवति आसनम् । स्थिरसुखमासनम् इति योगसूत्रे आसनलक्षणमुक्तम् । स्वास्तिकगोमुखपद्मसिद्धादीनि आसनानि बहुत्र निगदितानि सन्ति । सच्चिदानन्दसुखस्वरूपस्य ब्रह्मणः चिन्तैकात्मकमासनं भवति सुखासनम् । तस्मिन् ब्रह्मणि सिद्धिं गच्छतीत्यतः सिद्धासनमवगन्तव्यम् । उक्तञ्च योगशास्त्रे "स्थिरं सुखमासनम्। तद्यथा पद्मासनं वीरासनं भद्रासनमित्यादि प्रयत्नोपरमात् सिद्धत्यासनम् " (योगसूत्रभाष्यम् पृ.218) ॥

योगिनः अनायासेन अजस्रब्रह्मचिन्ता तदा सिद्ध्यति । उक्तञ्च विना जारचिन्तेव नार्याः । जारचिन्ता तु आयाससाध्या, किन्तु पतिव्रतानां भर्तृचिन्ता अनायासरूपा अजस्ररूपा च । एवं प्रकारेण -ब्रह्मणि चिन्तात्मकं भवति आसनम्। तत्स्वरूपम् एवं वर्णितम् -

सुखेनैव भवेद्यस्मिन्
अजस्रं ब्रह्मचिन्तनम्
आसनं तद्विजानीयात्
नेतरत्सुखनाशनम् (अपरोक्षानुभूतिः112)

मूलबन्धः

मूलं यस्मिन् परास्मिन् त्रिगुणविरहिते बध्यते ब्रह्मणि द्राक्

ब्रह्माकारं विशुद्धं प्रबलपरिचयात् चिन्तमेकान्तदृष्ट्या सेव्योयं मूलबन्धः अखिलजगदाधारभूते परब्रह्मणि चितां निरन्तराभ्यासात् बद्ध्यते ।तदा परिणामवशात् विषयवर्जं भवति मनः । तदेव मूलबन्धो नाम योगः । उक्तञ्च अपरोक्षानुभूतौ

यन्मूलं सर्वभूतानां यन्मूलं चित्तबन्धनम्
मूलबन्धः सदा सेव्यो योग्योसौ राजयोगिनाम् ॥(अपरोक्षानुभूतिः112)

ज्ञानपरिपाकयुक्तानामियमवस्था राजयोगिनामेव सिद्ध्यमिति अत्र सूचना ।

देहसाम्यम्

नवमाङ्गः भवति देहसाम्यम्। तल्लक्षणं तु

अङ्गानां समतां विद्यात्
समे ब्रह्मणि लीयते।
नो चेन्नैवसमानत्वम्
ऋजुत्वं शुष्कवृक्षवत्॥ (अपरोक्षानुभूतिः115)

ब्रह्मणि अध्यस्तानां स्वभावविषयाणां अधिष्ठानस्यैकत्वात् समतां समार्जनीया। सम्यगेवं विधस्य वैषम्यव्यवहारः विलीयते। करचरणाद्यवयवानां अधिष्ठानभूते देहे यथा समानता तथा ब्रह्मणि सर्वेषां समानता भवतीत्याशयः। शुष्कवृक्षर्जमिव ग्रीवाद्यवयवानां ऋजुत्वं समत्वं च न कृतं स्यात् तर्हि तस्य योगः निष्फलः स्यात्। अतः देहसाम्यमुपार्जनीयम्।

दृक् स्थितिः

दृशमतया दृक् स्थितिः निर्दिशते। स्वरूपं उपनिषदि एवमुक्तम् - दृष्टिं ज्ञानमयीं कृत्वा पश्येत् ब्रह्ममयं जगत्। सा दृष्टिः परमोदारा न नासाग्रावलोकनी दृष्टिर्दर्शनदृश्यानां विरामो यत्र वा भवेत् दृष्टिः तत्रैव कर्तव्या न नासाग्रावलोकिनी योगाभ्यासस्य चरमो लक्ष्यः भवति ब्रह्म अतः ब्रह्मणि फलव्याप्यत्वमस्ति ब्रह्मभावं वृत्तिव्याप्यत्वम्। अन्तःकरणवृत्तिं अखण्डब्रह्माकारतया कर्तव्यम्। ब्रह्मैवेदं जगत्सर्वमिति भावना कार्या इति अत्र निर्दिशते। सा दृष्टि न योगाङ्कोक्तनासाग्रावलोकिनी, किन्तु अखण्डज्योतिसाक्षात्कारदर्शनमेव अनेन विधीयते।

प्राणायामः

प्राणायामः प्राणवृत्तेः नैश्चच्यरूपः। तत्स्वरूपं -

चित्तासु सर्वभावेषु ब्रह्मत्वे सर्वभावनात्
निरोधः सर्ववृत्तीनां प्राणायामः स उच्यते। (अपरोक्षानुभूतिः118)

प्राणस्य मनोधीनत्वात् मनोनिरोधः प्रथमः कार्यः। तद्वारा प्राणनिरोधश्च। अतः मनोनिरोधोपायान् वर्णयित्वा प्राणनिरोधः प्रतिपादयति। प्राणायामे पूरककुम्भकरेचकरूपाः तिस्रो अवस्थाः प्रातिभासिकजगतां निषेधरूपः भवति रेचकः ब्रह्मात्मैक्यचिन्तनं पूरकः वृत्तेः निश्चलावस्था कुम्भकः। एते त्रयः परमात्मनः अनुभवात् स्वाभाविकतया भवन्तीति अभिज्ञानामभिप्रायः। उक्तञ्च पञ्चदशप्रकरणे -

' आभासानां निषेधं मुहुरपि जगतां रेचकं प्राहरेके
ब्रह्मैवास्मीति चिन्तां सहजमनुसृतां पूरकं कुम्भकं तु '

अत घ्राणपीडां विना प्राणवृत्तीनां एकत्र नैश्चल्यं सिद्ध्यति इति उपदिश्यते । प्राणायामः परं बलमिति अभिज्ञोक्तिः अस्य प्राधान्यं सूचयति ।

प्रत्याहारः

विषयेष्वात्मनां दृष्ट्वा मनसः चित्तरञ्जनम्
प्रत्याहारः स विज्ञेयः अभ्यसनीयो मुहुर्मुहुः ॥

विषयाणां नामरूपक्रियादीनां चित्स्वरूपतया अवस्थानं तस्य सिद्ध्यति । विषयात् इन्द्रियाणां विनिवर्तनमेव प्रत्याहारः । मोहनीयरञ्चनीयकविषयैः संप्रयुक्तः चित्तं तत्र तत्र परब्रह्मणः परमानन्दस्वरूपमेव अनुभवति । अतः मनसः चित्स्वरूपतया अवस्थानमेव प्रत्याहारमिति उपदेशः -

विषयस्त इव व्यापृतो निर्विकारः
प्रत्याहारैकनिष्ठो जयति सुधिवरो द्वादशाङ्गैव योगी

(पञ्चदशाङ्गप्रकरणं 12)

धारणा

योगस्य त्रयोदशमङ्गं भवति धारणा । ब्रह्मात्मनोः एकत्वानुभवं सिद्धस्य योगिनः चित्तं सर्वत्र विमलतया दर्शनं क्रियते । वासनबलेनाकृष्टे अपि विषयेषु तस्य न संस्पर्शः, ब्रह्मदर्शनानुभवः एव तत्र संभवति । अप्रयत्नेनैव तादृशानां योगिनां मनसः धारणं स्यात् । उक्तञ्च-

यत्र यत्र मनो याति
ब्रह्मणः तत्र दर्शनात्
मनसो धारणं चैव
धारणा सा परा मता ॥

देशबन्धचित्तस्य धारणा इति पातञ्जलोक्तधारणलक्षणं आधारादिषट्चक्रमध्ये एकत्र मनसः धारणं निर्दिशति । किन्त्वत्र योगिगम्यानुभवप्रसिद्धधारणां सूचयतीति विशेषः ।

ध्यानम्

नैरन्तर्याभ्यासेन नियमितमनसः निदिध्यासनम ब्रह्मभावं नयति। जीवन्मुक्तिवशात् तस्य ब्रह्माकारवृत्तिः उदेति । तथापि तस्य अहमिति भावः जडतया तत्र तिष्ठति । विदेहमुक्तिपर्यन्तं तदहन्ताभावः लसति। कर्मभूतामिमं अहन्तानिर्माजनमेव ध्यानलाभः। तत्र ' प्रत्ययैकतानता ध्यानमिति' पतञ्जलिः ध्यानस्वरूपं विवृणोति।

ब्रह्मैवास्मीति सद्वृत्त्या निरालम्बतया स्थितिः।

ध्यानशब्देन विख्याता परमानन्ददायिनी।

ब्रह्माकारवृत्त्या देहेन्द्रियादीनां उपाधीनाम् अनुसन्धानं विना अवस्थानं ध्यानमिति अत्र निर्दिशति। तादृशयोगिनां परमानन्दानुभवः सिद्ध्यतीति विशेषः अत्र सूचयति।

समाधिः

पञ्चदशतममङ्गं भवति समाधिः। तत्स्वरूपं तु

निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः।

वृत्तिविस्मरणं सम्यक् समाधिः ज्ञानसंज्ञकः ॥

विषयानुसन्धानविरहितान्तःकरमवृत्या परमानन्दस्वरूपे ब्रह्मणि तदाकारतया प्रविलयतं समाधिः। तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः इति पातञ्जलोक्तलक्षणम् । सर्वप्रपञ्चसंस्कारेण विरहितं, ध्यानृध्येयाकारवृत्तिशून्यं द्वैताननुसन्धानं स समाधिः। प्रकृत्यात्मकस्य अविद्यायाः तद्विकृतेः प्रपञ्चविषयादीनां च यत्र विस्मृतिः तत्र समाधिः सिद्ध्यति इत्याशयः।

उपसंहारः।

पातञ्जलयोगदर्शने सविस्तरं अष्टाङ्गयोगस्य स्वरूपलक्षणफलानां वर्णना राजयोगापरपर्यायतया समायोजिता। बहुत्र उपनिषत्सु अष्टाङ्गतया एव योगविस्तारः। तेजोबिन्दूपनिषदि, अपरोक्षानुभूतौ च पञ्चदशाङ्गयोगविचारः वर्ण्यते । न तु योगदृष्ट्या तत्प्रतिपादनं किन्तु वेदान्तसिद्धान्तानुसारेण योगानां जीवन्मुक्तं पुरस्कृत्यैवात्र विचारितं भवति। जीवन्मुक्तानां विविधाः दशाः योगाङ्गतया प्रतिपाद्य समर्थनं अप्पय्यदीक्षितेन्द्रेण विरचिते पञ्चदशाङ्गयोगप्रकरणे दृश्यते । ग्रन्थोयं आकृत्य लघुरपि पञ्चदशश्लोकैः परब्रह्मानुचिन्तकानां विद्यमानक्रमिकोन्नतिप्रदर्शनेन, विज्ञानदागदूरीकरणेन च

अत्यन्तश्रद्धावहति । न केवलं योगाङ्गवर्णना अपि तु योगमुक्तस्य अवस्था एव अस्मिन् चमत्कारित्वेन वर्ण्यते । व्यासशाङ्करभाष्येषु उपर्युक्तानामवस्थानां अष्टसु अन्तर्निहितत्वं करोति तथापि अस्य माहात्म्यसूचनाय प्रबन्धोयं पर्याप्तः ।